# Sri Bala Tripurasundari Pancharatna Stotram

आ-ई आनन्दवल्ली अमृतकरतली आदिशक्तिः परा-ई
माया ( मा-ई ) मायात्मरूपी स्फटिकमणिमयी मा मतङ्गी षडङ्गी ।
ज्ञानी ज्ञानात्मरूपी नलिनपरिमली नाद ओङ्कारमूर्तिः
योगी ( भोगी ) योगासनस्था भुवनवशकरी सुन्दरी ऐं नमस्ते ॥ १ ॥

बालामन्त्रे ( मालामन्त्री ) कटाक्षी मम हृदयसुखी मत्तभावप्रचण्डी
व्याली यज्ञोपवीती विकटकटितटी वीरशक्तिः प्रसन्ना ।
बाला बालेन्दुमौलिर्मदगजगमना साक्षिका स्वस्तिमन्त्री
काली कङ्कालरूपी कटिकटिक ( कटिकटिकटि ) ह्लीङ्कारिणी क्लीं नमस्ते ॥ २ ॥

मूलाधारा महात्मा हुतवहनयनी ( हुतवहसलिला ) मूलमन्त्रा त्रिनेत्रा
हारा केयूरवल्ली अखिलत्रिपदका ( अखिलप्रियकरी ) अम्बिकायै प्रियायै ( अम्बिका-इ अ-आ-ई ) ।
वेदा वेदाङ्गनादा ( वेदान्तनादा ) विनतघनमुखी वीरतन्त्रीप्रचारी
सारी( रा ) संसारवासी सकलदुरितहा ( सकलसुखकरी ) सर्वतो ( सुन्दरी ) ह्लीं ( सौः ) नमस्ते ॥ ३ ॥

ऐं क्लीं ह्लीं ( ऐं क्लीं सौः ) मन्त्ररूपा शकलशशिधरा सम्प्रदायप्रधाना ( सम्प्रदायात्मरूपी )

क्लीं ह्लीं श्रीं बीजमुख्यैः हिमकरदिनकृज्ज्योतिरूपा सरूपा ( प्रभावी ) ।
सौः क्लीं ऐं शक्तिरूपा प्रणवहरिसते बिन्दुनादात्मकोटिः
क्षां क्षीं क्षूंकारनादे सकलगुणमयी सुन्दरी ऐं नमस्ते ॥ ४ ॥

अध्याना( नी ) ध्यानरूपा( पी ) असुरभयकरी आत्मशक्तिस्वरूपा
प्रत्यक्षा( क्षी ) पीठरूपी प्रलययुगधरा ( प्रणतबलकरी ) ब्रह्मविष्णुत्रिरूपी ।
शुद्धात्मा सिद्ध( शुद्ध )रूपा हिमकिरणनिभा स्तोत्रसंक्षोभशक्तिः
सृष्टिस्थित्यन्तमूर्तिस्त्रिपुरहरजयी सुन्दरी ऐं नमस्ते ॥ ५ ॥

॥ इति शिवम् ॥

ā-ī ānandavallī amṛtakaratalī ādiśaktiḥ parā-ī
māyā ( mā-ī ) māyātmarūpī sphaṭikamaṇimayī mā mataṅgī ṣaḍaṅgī ।
jnānī jnānātmarūpī nalinaparimalī nāda oṅkāramūrtiḥ
yogī ( bhogī ) yogāsanasthā bhuvanavaśakarī sundarī aiṃ namaste ॥ 1 ॥

bālāmantre ( mālāmantrī ) kaṭākṣī mama hṛdayasukhī mattabhāvapracaṇḍī
vyālī yajnopavītī vikaṭakaṭitaṭī vīraśaktiḥ prasannā ।
bālā bālendumaulirmadagajagamanā sākṣikā svastimantrī
kālī kaṅkālarūpī kaṭikaṭika ( kaṭikaṭikaṭi ) hrīṅkāriṇī klīṃ namaste ॥ 2 ॥

mūlādhārā mahātmā hutavahanayanī ( hutavahasalilā )
mūlamantrā trinetrā
hārā keyūravallī akhilatripadakā ( akhilapriyakarī ) ambikāyai
priyāyai ( ambikā-i a-ā-ī ) |
vedā vedāṅganādā ( vedāntanādā ) vinataghanamukhī
vīratantrīpracārī
sārī( rā ) saṃsāravāsī sakaladuritahā ( sakalasukhakarī ) sarvato
( sundarī ) hrīṃ ( sauḥ ) namaste || 3 ||

aiṃ klīṃ hrīṃ ( aiṃ klīṃ sauḥ ) mantrarūpā śakalaśaśidharā
sampradāyapradhānā ( sampradāyātmarūpī )
klīṃ hrīṃ śrīṃ bījamukhyaiḥ himakaradinakṛjjyotirūpā sarūpā
( prabhāvī ) |
sauḥ klīṃ aiṃ śaktirūpā praṇavaharisate bindunādātmakoṭiḥ
kṣāṃ kṣīṃ kṣūṃkāranāde sakalaguṇamayī sundarī aiṃ namaste
|| 4 ||

adhyānā( nī ) dhyānarūpā( pī ) asurabhayakarī ātmaśaktisvarūpā
pratyakṣā( kṣī ) pīṭharūpī pralayayugadharā ( praṇatabalakarī )
brahmaviṣṇutrirūpī |
śuddhātmā siddha(śuddha)rūpā himakiraṇanibhā
stotrasaṃkṣobhaśaktiḥ
sṛṣṭisthityantamūrtistripuraharajayī sundarī aiṃ namaste || 5 ||

|| iti śivam ||

www.kamakotimandali.com